स्मयतुषितं विदर्भजा-
ननगीराजनवर्द्धमानकम् ॥"

रुक्मिणी च ॥

विदर्भराज:, पुं, ( विदर्भाणां राजा । "राजाहः-सखिभ्यष्टच् ।" इति टच् । ) विदर्भदेशाधिपति: । तस्य नामान्तरं भीमराज: । यथा,—

"अरोपतमोऽपि भ्रष्टं न स प्रभु-
र्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसून् शर्म्म च मानिनो वरं
त्यजन्ति न त्वेकमयाचितव्रतम् ॥"

इति पूर्ब्बनैषधे । १ । ५० ॥

विदर्भसुभ्रू:, स्त्री, ( विदर्भस्य सुभ्रू रमणी ।) दमयन्ती । यथा,—

"विदर्भसुभ्रूस्तनतुङ्गताप्तये
घटानिवापश्यदलं तपस्यत: ।
फलानि धूमस्य धयानधोमुखान्
स दाड़िमे दोहदधूपिनि द्रुमे ॥"

इति पूर्ब्बनैषधे १ सर्ग: ॥

विदर्भाधिपति:, पुं, ( विदर्भाणामधिपति: । ) कुण्डिनपति: । स च भीष्मकराज: रुक्मिणीपिता च । यथा,—

"तं वै विदर्भाधिपति: समभ्येत्याभिवाद्य च ।
निवेशयामास मुदा कल्पितान्यनिवेशने ॥"

इति श्रीभागवतीयदशमस्कन्धे ५३ अध्याय: ॥

विदलं, क्ली, ( विघट्टितं दलं यस्य । ) द्विधाकृतकलायादि । दालि इति भाषा । स्वर्णादेरवयव: । दाड़िमकल्क: । वंशादिकृतपात्रविशेष: । इति क्लीवलिङ्गसंग्रहे अमरभरतौ ॥

विदल:, पुं, ( विघट्टितानि दलानि यस्य । ) रक्तकाञ्चन: । इति शब्दरत्नावली ॥ पिष्टक: । इति शब्दचन्द्रिका ॥

विदला, स्त्री, ( विघट्टितानि दलानि यस्या: । ) त्रिवृत् । इति राजनिर्घण्ट: ॥ पत्रशून्या । यथा,

"विशीर्णा विदला ह्रस्वा वक्रा स्थूला द्विधा-
कृता ।
कृमिदष्टा च दीर्घा च समिधो नैव कारयेत् ॥"

इति तन्त्रम् ॥

विदा, स्त्री, ( विद् ज्ञाने+"षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । टाप् । ) ज्ञानम् । बुद्धि: । इति मेदिनी । दे, १४ ॥

विदाय:, पुं, ( विगतो दाय: वाचात्मकदानादिरूपक्षणं येन । ) गमनानुमति: । यथा,—

"क्षणं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ! ।
क्षणं गृहञ्च यास्यामि विशिष्टं कार्य्यमस्ति मे ।
विदायं देहि संप्रीत्या क्षणं मे प्राणवल्लभे ॥"

इति ब्रह्मवैवर्त्ते जन्मखण्डे श्रीराधां प्रति श्रीकृष्णवाक्यम् ॥

विदार:, पुं, ( वि+दृ+घञ् । ) जलोच्छ्वास: । विदारणम् । इति मेदिनी । रे, ११६ ॥ युद्धम् । इति हेमचन्द्र: ॥

विदारकं, क्ली, (विदृणातीति । वि+दृ+ण्वुल् ।) वज्रक्षारम् । इति राजनिर्घण्ट: ॥

विदारक:, पुं, (विदृणाति जलयानादीनिति । वि+दृ+ण्वुल् । ) जलमध्यस्थिततरुशिलादि: । तत्पर्य्याय: । कूपक: २ । इत्यमर: ॥ जलबन्धक: । इति शब्दरत्नावली ॥ शुष्कनद्यादौ जलावस्थानार्थं गर्त्त: । इति सर्व्वधर: ॥ अतएव कूपा इव कूपका: । कुत्सितास्च कूपा इति वा । विदारयन्तीति विदारका: । जलान्तर्गतास्तरुशिलादयोऽश्मानात्नौकादिविदारका: कूपका: । इति स्वाम्य: । बहुत्वमतन्त्रम् । इति भरत: ॥

विदारणं, क्ली, ( वि+दृ+णिच्+भावे ल्युट् ।) विडम्ब: । भेद: । इति मेदिनी । णे, १०७ ॥ ( यथा, हरिवंशे । ६५ । ७६ ।

"आयुधावाप्तिरत्रैव वपुषो वैध्यवस्य च ।
लव्धाराच तेजसश्चैव यूहानाच विदारणम् ॥")

मारणम् । इति शब्दरत्नावली ॥

विदारण:, पुं स्त्री, (विदार्य्यन्ते शत्रवोऽस्मिन्निति । वि+दृ+णिच्+ल्युट् । ) युद्धम् । इति मेदिनी । णे, १०७ ॥ (विदारयतीति । वि+दृ+णिच्+ल्यु: । विदारके, त्रि । यथा, मार्कण्डेये । २० । २ ।

"तस्यात्मजो महावीर्य्यो बभूवारिविदारण: ॥")

विदारण:, पुं, ( विदार्य्यतेऽसौ इति । वि+दृ+णिच्+कर्म्मणि ल्युट् ।) कर्णिकारवृक्ष: । इति शब्दचन्द्रिका ॥

विदारिका, स्त्री, (वि+दृ+णिच्+ण्वुल् । टापि अत इत्वम् ।) शालपर्णी । इति शब्दरत्नावली ॥ ( यथा, बृहत्संहितायाम् । ७६ । ५ ।

"विदारिकाया स्वरसेन चूर्णं
सुहुर्मुहुर्भावितशोषितञ्च ।
शृतेन दुग्धेन सशर्करेण
पिवेत् स यस्य प्रमदा: प्रभूता: ॥")

विदारिणी, स्त्री, (विदृणातीति । वि+दृ+णिनि: । ङीप् । ) काश्मरी । इति राजनिर्घण्ट: ॥ ( विदारणकर्त्री । यथा, कथासरित्सागरे । ५३ । १७१ ।

"एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकालि महालक्ष्मि सिद्धे रुरुविदारिणि ॥")

विदारी, स्त्री, (विदारयतीति । वि+दृ+णिच्+अच् । गौरादित्वात् ङीष् ।) शालपर्णी । इति मेदिनी ॥ भूमिकुष्माण्ड: । तत्पर्य्याय: । क्षीरशुक्ला २ इक्षुगन्धा ३ क्रोष्ट्री ४ । इत्यमर: । विदारिका ५ स्वादुकन्दा ६ सिता ७ शुक्ला ८ शृगालिका ९ वृष्यकन्दा १० बिड़ाली ११ वृष्यवल्लिका १२ भूकुष्माण्डी १३ स्वादुलता १४ गजेष्टा १५ वारिवल्लभा १६ गन्धफला १७ । अस्या गुणा: । मधुरत्वम् । शीतत्वम् । गुरुत्वम् । स्निग्धत्वम् । अस्रपित्तनाशित्वम् । कफकारित्वम् । पुष्टिबलवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्ट: ॥ विदारी वातपित्तघ्नी वृष्या बल्या रसायनी इति राजवल्लभ: ॥ * ॥ अष्टादश-प्रकारकण्ठरोगान्तर्गत-रोगविशेष: । यथा, अथ विदारीमाह ।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥"

स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवति इत्यर्थ: । इति भावप्रकाश: ॥ अस्याश्चिकित्सादि रोहिणीशब्दे द्रष्टव्यम् ॥

विदारी, [न्] त्रि, विदारणकर्त्ता । विपूर्व्वदृधातो: कर्त्तरि णिनिप्रत्ययेन निष्पन्न: ॥

विदारीगन्धा, स्त्री, ( विदार्य्या भूमिकुष्माण्डस्येव गन्धो यस्या: । ) शालपर्णी । इत्यमर: ॥

विदाल:, पुं, क्रकचपाद: । लूतकलास: । इति हारावली । २१८ ॥

विदाहि, [न्] क्ली, ( विदहतीति । वि+दह+णिनि: । ) दाहजनकद्रव्यम् । अस्य गुणौ । पित्ताम्लत्वकारित्वे । इति राजवल्लभ: ॥ ( दाहजनकमात्रे, त्रि । यथा, गीतायाम् । १७ । ९ ।

"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन: ।
आहारा राजसस्येष्टा दु:खशोकामयप्रदा: ॥")

विदिक्, [श्] स्त्री, ( दिग्भ्यां विगता ।) दिशोर्मध्यम् । अग्निनिर्ऋतिवायुशानकोणचतुष्टयम् । तत्पर्य्याय: । अपदिशम् २ । इत्यमर: ॥ प्रदिक् ३ । इति जटाधर: ॥ विदिशम् ४ । इति शब्दरत्नावली ॥ कोण: ५ । इति राजनिर्घण्ट: ॥ ( यथा, भागवते । ४ । १७ । १६ ।

"सा दिशो विदिशो देवी रोदसी चान्तरं तयो: ।
धावन्ती तत्र तत्रैनं ददर्शानुद्यतायुधम् ॥")

विदिक्चङ्ग:, पुं, हरिद्राङ्गपक्षी । इति शब्दचन्द्रिका ॥

विदितं, त्रि, ( विद्+क्त: । ) अवगतम् । इत्यमर: ॥ ( यथा, महाभारते । ७ । २८ । २२ ।

"सवाश: सधनुषाहं ससुरासुरमानुषान् ।
शक्तो लोकानिमान् जेतुं तच्चापि विदितं
तव ॥")

अर्थितम् । इति मेदिनी । ते, १०६ ॥ उपगम: । इति शब्दरत्नावली ॥

विदित:, पुं, ( विदितं ज्ञानमस्यास्तीति । अर्श-आदित्वात् अच् । ) कवि: । इति जटाधर: ॥ ( ज्ञानाश्रये, त्रि । यथा, किराते । १ । १ ।

"श्रिय: कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
सवर्णिलिङ्गी विदित: समाययौ
युधिष्ठिरं द्वैतवने वनेचर: ॥"

विदिथ:, पुं, पण्डित: । योगी । इति शब्दरत्नावली हलायुधमेदिनी च ॥ मुद्राङ्कितमेदिन्यां हेमचन्द्रे च विदथ इति पाठ: ॥

विदीर्ण:, त्रि, ( वि+दृ+क्त: । ) कृतविदारण: । चेरा इति भाषा । यथा,—

पितर ऊचु: ।

"श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजै-
र्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।